दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णचतुर्थी
आश्विन् 14 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-341 | 1 | सितम्बर 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 भारतं प्रमुखं वैश्विक-विमानयान-केन्द्ररूपेण उद्भूतम् अस्ति अथ च विश्वस्य तृतीयं वृहत्तमं विमानयान-विपणी भवितुं कार्यं कुर्वन् अस्ति - राममोहन-नायडुः

4 लोकतन्त्रस्य संविधानस्य च रक्षणाय काङ्ग्रेस-दलस्य सङ्घर्षः निरन्तरं प्रवर्तिष्यते – मुख्यमन्त्री सुक्खू

8 'प्रधानमन्त्री- साहित्यकार-गौरवसम्मानेन' विभूषिताः बिहारस्य त्रिषष्टिः (६३) हिन्दी-सेविनः


## एशियन-क्रीडा-प्रतिस्पर्धासु नीरू ढाण्डा इत्यनया महिलानां व्यक्तिगत-ट्रैप्-स्पर्धायां भारताय स्वायत्तीकृतं प्रथमं सुवर्ण-पदकम्




ऐषमः एशियन-क्रीडासु नीरू ढाण्डा इत्येषा महिलानां ट्रैप-व्यक्तिगत स्पर्धायां स्वर्णपदकं प्राप्तवती प्रथमा भारतीया शूटर् भूत्वा इतिहासं निर्ममे। इतः प्राक् सा आशिमा अहलावत्, मनीषा कीर् इत्येताभ्यां सह महिलानां ट्रैप्-दल-स्पर्धायां रजतपदकं प्राप्तवती। बाक्सिङ्ग इति मुष्टामुष्टी-क्रीडायां परवीन हुड्डा, अङ्कुश पंघालः च निशियो इत्यत्र क्रीडायां उपान्त्यचक्रीय-विजयैः स्वस्व-भारवर्गेषु स्वर्णपदक-स्पर्धायां प्रविष्टवन्तौ। एथ्लेटिक्स्-क्रीडायां पुरुषाणां जेवलिन्-श्रो-स्पर्धायां भारतं द्वेपदके विजितम्। यशवीरसिंहः रजतपदकं प्राप्तवान्, रोहित् यादवः कांस्यपदकं च प्राप्तवान्। पुरुषाणां लॉन्ग-जम्प् इत्यस्मिन् श्रीशङ्कर-मुरली इत्येषः रजतपदकं प्राप्तवान्। गुलवीर् सिंहः अपि अपरं रजतपदकं योजितवान्। शूटिङ्ग्-क्रीडायां ईशा सिङ्ग इत्येषा महिलानां पञ्चविंशति-मीटर्-पिस्टल्-व्यक्तिगत-स्पर्धायां रजतपदकं प्राप्तवती। षड्विंशत्यधिक द्विसहस्रतमे वर्षे एशियन क्रीडासु भारतं आहत्य द्विपंचाशत् पदकानि समर्जितानि। सम्प्रति पदक-तलिकायां षट्-स्वर्णपदकानि, एकविंशति रजतपदकानि, पंचविंशति कांस्य पदकानि च सन्ति।

## हिन्दमहासागर-क्षेत्रे भारतं प्राथमिक-सुरक्षा-सहभागी अथ च विश्वसनीयतायाः प्रतीकत्वेन दृढतया प्रतिष्ठितं वर्तते - रक्षामन्त्री




हिमसंस्कृतवार्ता नवदेहली।
रक्षामन्त्रिणा राजनाथ सिंहेन सबलं प्रतिपादितं यत् परिवर्तमान प्रौद्योगिक्याः, अनिश्चिततायाः अथ भौगोलिक-निकटतायाः उत्पन्नानां नूतनाव्हानानां मध्ये भारतेन स्व-सज्जतायां भू-सामरिक चिन्तनम् आपत्कालीन-योजना च अभिन्न-भागत्वेन अङ्गीकरणीये। नवदिल्ल्यां भारतीय नौसेना-कमाण्डर-सम्मेलनम् सम्बोधयन् श्रीसिंहः अवोचत् यत् देशस्य लक्ष्यं सुस्पष्टम् अस्ति संकटस्य आगमनात् पूर्वमेव अस्माकं सज्जता भवेत्। रक्षा-मन्त्रिणा कथितं यत् प्रचलत् ऊर्जा-सुरक्षा-अभियानम् देशस्य ऊर्जा-आपूर्ति-मार्गाणां राष्ट्रिय हितानां च संरक्षणं भारतीय नौसेनायाः व्यावसायिकतां सहैव सञ्चालन-सज्जतां पुनः एकवारं प्रामाणयत्। सः न्यरूपयत् यत् हिन्द महासागर-क्षेत्रे भारतं प्रथम-सहायकः प्राथमिक-सुरक्षा-सहभागी सहैव विश्वास-विश्वसनीयतयोः प्रतीक-रूपेण दृढतया तिष्ठति, येन राष्ट्रस्य महासागर इति परिकल्पना सुदृढा जायते। श्रीसिंहेन प्रोक्तं यत् दक्षिण चीन सागरे, भूमध्य सागरे तथा अलाण्टिक महासागरे भारतीय-युद्धपोतानां सशक्त-उपस्थितिः राष्ट्रस्य नील-जल-सैन्य-सामर्थ्यं प्रदर्शयति। सप्तचत्वारिं-शदधिक-द्विसहस्रतमवर्षं यावत् विकसित-भारत-संकल्पस्य सिद्धौ भारतीय नौसेना एका सामरिक आलम्ब-शिला रूपेण कार्यं करोतीति प्रतिपाद्य सः नौसेनायाः उच्च-स्तरीय-युद्ध-सज्जताम् प्राशंसत्। सः प्रोक्तवान् यत् भारतस्य सामुद्रिक-शक्तेः उद्देश्यं केवलं समुद्रे राष्ट्रध्वज-प्रदर्शनं नास्ति, अपितु यत्र कुत्रापि त्रिवर्ण-ध्वजः दृश्यते, तत्र सुरक्षायाः, विश्वासस्य अथ च दृढ-आश्वासस्य संचारः भवेदित्यस्ति।

## अद्यतनीयं सुभाषितम्

**अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च।**
**मधुरैः कोपमायाति कटुकैरुपशाम्यति।।**

भावार्थः- अहो! कफ और एक दुष्ट व्यक्ति, इन दोनों की प्रकृति में कितनी समानता है। दोनों मधुरता (मीठी वस्तुओं या अच्छे व्यवहार) से कुपित हो जाते हैं परन्तु यदि उनसे कटु व्यवहार (कड़वी औषधि या दुष्ट व्यक्ति से उसी के समान आचरण) किया जाए तो वे शान्त हो जाते हैं।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा





## निर्वाचनायोगेन उत्तरप्रदेश-उत्तराखण्डयोः एकादश-राज्यसभासनानां द्विवार्षिक-निर्वाचनाय प्रकाशिता अधिसूचना

निर्वाचनायोगेन एकादश-राज्यसभासनानां द्विवार्षिक-निर्वाचनाय अधिसूचना निस्सारिता । एतेषु उत्तरप्रदेशस्य दशासनानि उत्तराखण्डस्य च एकम् आसनम् अन्तर्भवति। भाजपादलस्य नेतारौ केन्द्रीय-मन्त्रिणौ हरदीपसिंह-पुरी, बी. एल. वर्मा, समाजवादी दलस्य नेता रामगोपाल यादवः, बसपा-दलस्य रामजी अन्ये च षट् सदस्याः आगामि-नवम्बर-मासस्य पञ्चविंशति-दिनाङ्के स्व-कार्यकालं पूरयिष्यन्ति। उत्तराखण्डतः नरेश बंसलस्यापि कार्यकालः अस्मिन्नेव दिने समाप्तिमेष्यति। आयोगेन पश्चिमबङ्गालस्य एकस्मै रिक्त-राज्यसभासनाय अपि उपनिर्वाचनस्य अधिसूचना प्रसारिता। इदं स्थानं तृणमूल-काङ्ग्रेस-दलस्य संसद् सदस्यायाः रुक्मिणी-मल्लिकायाः त्यागपत्रेण रिक्तम् आसीत्। एतेषां निर्वाचनानां कृते नामाङ्कन-प्रक्रिया अद्यतन प्रारब्धा वर्तते, मतदानं च आगामि-अक्तूबर-मासस्य षोडश-दिनाङ्के सम्पत्स्यते ।



# सीमा-रोध-समाधानेन

## भारत-चीन सम्बन्धाः सुदृढाः सञ्जाताः - विदेशमन्त्री

विदेशमन्त्रिणा डॉ.एस. जयशङ्करेण अवदत् यत् चीन-देशेन सह भारतस्य सम्बन्धाः गतवर्षापेक्षया अद्यत्वे उत्तमाः वर्तन्ते। न्यूयॉर्क-नगरे एशिया-सोसायटी इति संस्थया आयोजिते सम्मेलने भाषमाणः डॉ. जयशङ्करः अवोचत् यत् सीमा-रोधस्य समाधानानन्तरमेव सम्बन्धानां पुनः परिष्कारः प्रारब्धः। सः स्पष्टीकृतवान् यत् भारतेन दीर्घकालादेव चीनपक्षाय प्रतिपाद्यते यत् द्विपक्षीय-सम्बन्धेषु शैथिल्यं कस्यापि देशस्य हिताय न भवति, सहैव दीर्घकालीनः सीमारोधः अपि कस्यापि राष्ट्रस्य हितं न साधयति। भारत-अमेरिका-सम्बन्धानाम् अथ च व्यापार-सन्धि-वार्तानां प्रसङ्गे विदेश-मन्त्री न्यरूपयत् यत् उभौ देशौ इदानीम् एवं भूतां स्थितिं प्राप्तवन्तौ यत्र व्यापारसन्धौ परस्परं सहमतिः जाता। अनेनैव सह विदेशमन्त्रिणा प्रतिपादितं यत् रूस-यूक्रेन-सङ्घर्षस्य अथ च ईरान-उपसागर-सङ्घर्षस्य वैश्विक-दक्षिणस्य अर्थव्यवस्थासु विनाशकारी प्रभावः जातः। सः ऊर्जा-सुरक्षा-स्थितौ चिन्तां प्राकटयत्। डॉ. जयशङ्करः सचेतितवान् यत् आगामिषु मासेषु महतः खाद्य-संकटस्य अथ उर्वरकाणां तीव्र-न्यूनतायाः गम्भीरा सम्भावना वर्तते।



## दोहा-नगरे ए.आई.आई.बी-वार्षिक सम्मेलनावधौ भारत-सऊदी अरब-देशाभ्यां रक्षा-सुरक्षा-व्यापारादि-क्षेत्रेषु सहयोगस्य समीक्षा विहिता

भारत-सउदी अरेबिया-देशयोः रक्षा, सुरक्षा, व्यापारः, निवेशः, ऊर्जा, प्रौद्योगिकी, स्वास्थ्यसेवा, शिक्षा इत्यादिषु क्षेत्रेषु सहकारः समीक्षितः। दोहा-नगरे ए.आई.आई. बी-वार्षिकसभायाः अनन्तरं सउदी-वित्तमन्त्रिणा मोहम्मद् अल्जदान इत्यनेन सह उपवेशनानन्तरं वित्तमन्त्रिणा निर्मला सीतारमण इत्यनया सउदी अरेबिया-देशः भारतस्य विश्वसनीयः मूल्यवान् च सामरिकसहभागीति अवोचत्। भारत-सउदी अरेबिया-द्वैपाक्षिक-निवेश-सन्धि-विषये वार्तालापस्य सफलसमाप्ति तौ अङ्गीकृतवन्तौ, यस्य उद्देश्यं निवेशार्थं सुदृढं, अधिकं पूर्वानुमेयं च संरचना प्रदानम् अस्ति।

# भारतं प्रमुखं वैश्विक-विमानयान-केन्द्ररूपेण उद्भूतम् अस्ति अथ च विश्वस्य तृतीयं वृहत्तमं विमानयान-विपणी भवितुं कार्यं कुर्वन् अस्ति - राममोहन-नायडुः




नागरिक-विमानन-मन्त्री के. राममोहन नायडुः अवदत् यत् भारतं प्रमुखं वैश्विक-विमानयान-केन्द्ररूपेण उद्भूतम् अस्ति अथ च विश्वस्य तृतीयं वृहत्तमं विमानयान-विपणी भवितुं कार्यं कुर्वन् अस्ति। नवदेहल्यां सप्तविंशत्यधिक द्विसहस्रतमवर्षस्य रूट्स् एशिया-इत्यस्मिन् विषये पूर्वावलोकन वार्ताहरसम्मेलनं सम्बोधयन् श्री. नायडुः अवदत् यत् भारतस्य लक्ष्यम् अस्ति यत् सप्तचत्वारिंशदधिक-द्विसहस्र तमवर्षपर्यन्तं वर्तमानस्य चतुर्विंशति-कोटितः त्रिंशोत्तरैकशतकोटिं यावत् यात्रिणां सङ्ख्या षट्गुणितं वर्धयेदिति। देशे प्रचाल्यमान-विमानस्थानकानां सङ्ख्या चतुर्दशाधिक-द्विसहस्रतमे वर्षे चतुःसप्ततितः वर्तमानकाले षट्षष्ठ्यधिकैक-शततः अधिका जाता इति मन्त्री अवधानं दत्तवान्। क्षेत्रीय-सम्पर्क-योजना-उडान् इत्यस्य विषये प्रवदन् श्री-नायडुः अवदत् यत् अनया योजनया सम्पूर्ण देशे विमानयात्रा सुलभतरा, जाता। मन्त्री अवदत् यत् आगामिवर्षस्य मार्च-मासस्य षोडशदिनाङ्कात् नवदिल्ल्यां सप्तविंशत्यधिक द्विसहस्रतमवर्षे रूट्स्-एशिया इत्यस्य त्रयोविंशतितमस्य संस्करणस्य आतिथ्यं भारतं करिष्यति।



# अंश-विपण्याः दैनिकवार्ता

हिमसंस्कृतवार्ताः- डॉ विमलेश झा, मुम्बई, २९ सितम्बर २०२६। भारतीय-अंश-विपण्यां मंगलवासरे व्यवसायस्य समापनं द्वितीयदिनेऽपि अवनत्या अभवत्। प्रारम्भिकव्यवसाये विपण्यां तीव्रः उन्नतावनतिः दृष्टा। यद्यपि दिनस्य न्यूनतमस्तरात् विपणिः काचित् उन्नतिः, तथापि समग्रतया विक्रयप्रभावः निरन्तरं वर्धितः।बीएसई-सेन्सेक्स- सूचकाङ्कः २४२.६५ अङ्कैः अवनतः सन् ७२,५२९.०७ अङ्केषु दिवसस्य समापनं कृतवान्। निफ्टी-५०-सूचकाङ्कः ६४.०५ अङ्कैः न्यूनः भूत्वा २२,७१६.२० अङ्केषु स्थिरः अभवत्। विपण्याः अवनतेः प्रमुखेषु कारणेषु अपरिष्कृततैलस्य वर्धमानानि मूल्यानि, पश्चिम- एशियायां आपूर्तिविघातसम्बद्धाः आशङ्काः, तथा च विदेशीय-संस्थागत-निवेशकानां निरन्तरं विक्रयः प्रमुखाः सन्ति। तदतिरिक्तम् उच्चस्तरे स्थिताः अमेरिकीबन्धपत्राणां प्रतिफलशुल्कं, भारतीयरुप्यकस्य उपरि च वर्तमाना दाबस्थितिरपि विपण्यां प्रभावं जनितवती। क्षेत्रीयव्यवसाये सूचनाप्रौद्योगिकी, वाहन, दैनन्दिनोपभोग्य-वस्तु, उपभोक्तृस्थायिवस्तुक्षेत्रेषु अधिकः विक्रयप्रभावः दृष्टः। अपरतः औषधि, धातुः, सञ्चारमाध्यमक्षेत्राणि च तुलनया सुदृढं प्रदर्शनं कृतवन्ति। समग्रतया वैश्विकविपणिषु विद्यमानः प्रभावः, अपक्वतैलस्य वर्धमानं मूल्यं, विदेशीयनिवेशकानां धननिर्गमनं, रुप्यकस्य दुर्बलता च भारतीय- अंश-विपण्याः उपरि भारस्य प्रमुखकारणानि अभवन्।

## सिद्धार्थनगरे अतिवृष्टेः अनन्तरं वनविभागः सतर्कः, पतितवृक्षानां सूचनार्थं सम्पर्कसङ्ख्याः प्रकाशिताः

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, सिद्धार्थनगरम्। जनपदे विगतेषु त्रिषु दिवसेषु सततं प्रचण्डवृष्टेः कारणात् मार्गेषु, नहरमार्गेषु, सार्वजनिकस्थलेषु तथा जनवस्तीनां समीपे च अनेकाः वृक्षाः उन्मूलिताः भूत्वा पतिताः सन्ति। एतद् दृष्ट्वा सामाजिकवनीकी वनप्रभागेन पतितान्, झुकितान् तथा संकटजनकान् वृक्षान् निष्कासयितुं क्षेत्रीयवनाधिकारिणः सक्रियाः कृताः। वनविभागस्य दलानि सम्बन्धित-क्षेत्रीयवनाधिकारिणां निर्देशनानुसारं वृक्षान् निष्कास्य यातायातं तथा जनानाम् आवागमनं सुचारुं कर्तुं कार्यरताः सन्ति। विभागेन सामान्यजनैः, पुलिसप्रशासनेन तथा प्रशासनिकाधिकारिभिः संकटजनकवृक्षाणां सूचना तत्कालं सम्बन्धिताधिकारिभ्यः प्रदातुं आग्रहः कृतः।

**क्षेत्रानुसारं सम्पर्कसङ्ख्याः-**

**नौगढ़परिक्षेत्रम्- राजेशकुमारः-**
7839434719 / 9415855999
**बांसीपरिक्षेत्रम्- शिवकुमारगुप्तः-**
7839434717 / 9565552831
**खेसरहापरिक्षेत्रम्- सुशीलकुमारः-**
7839434720 / 9311250764
**इटवापरिक्षेत्रम्- मो. इलियासखानः-**
7839434717 / 6307351861
**डुमरियागञ्जपरिक्षेत्रम्- छविनाथत्रिपाठी-**
7839434716 / 6394760286
**प्रभागीयकार्यालयम्-**
दिव्यप्रकाशभारती- 7651916175

जनसुरक्षार्थं वनविभागस्य परामर्शः

वनविभागेन जनसामान्यं प्रति वर्षाकाले तथा तीव्रवायुवेगे सति विशालानां, जीर्णानाम् अथवा अपुष्टवृक्षाणां अधः न स्थातुं परामर्शः प्रदत्तः। मौसमस्य सामान्यावस्थां यावत् वृक्षाणाम् अधः वाहनानि न स्थापनीयानि, न च तत्र आपणानि स्थापनीयानि। बालकानां वृक्षाधः क्रीडनमपि निवारणीयम्।




# हानि-ग्रस्ताय 'एचआरटीसी' संस्थानाय वैद्युत-बस-यानानि सञ्जातानि वरदानम्; प्रतिदिनं ७-८ लक्ष-रूप्यकाणां तैलोपभोग-रक्षणम्

हिमसंस्कृतवार्ता — शिमला।
प्रायः द्विसहस्र-द्विशत-कोटि-रूप्यकाणां (२२०० कोटि) सञ्चित-हानिम् अभिमुखीकुर्वते 'हिमाचल-पथ-परिवहन-निगमाय' (HRTC) वैद्युत-बस-यानानि (E-Buses) महदाश्रयं प्रदत्तवन्ति। निगमस्य प्रारम्भीक-समीक्षायां स्पष्टीकृतं यत् वैद्युत-बस-यानानां सञ्चालनेन प्रतिदिनं प्रायः सप्त-तः अष्ट-लक्ष-रूप्यकाणां (७-८ लक्ष) डीजल-तैलस्य रक्षणं जायमानम् अस्ति। अनेन निगमाय प्रतिमासं प्रायः २.४० कोटि-रूप्यकाणां वित्तीय-लाभः भविष्यति इति अनुमानं वर्तते। निगम-प्रबन्धनेन विगत-पञ्चदश-दिनानां सञ्चालन-व्ययस्य च आकलनं कृत्वा तस्य प्रतिवेदनं सर्वकाराय प्रेषितम्।
निगमस्य यान-सङ्ग्रहे सम्मिलितानि २९७ वैद्युत-बस-यानानि रविवासरात् आरभ्य विविध-मार्गेषु नियमित-रूपेण धावनम् आरब्धानि। पूर्वम् एतेषां यानानां पृथक्-पृथक्-चरणेषु प्रायोगिक-परीक्षणं (Trial) क्रियमाणम् आसीत्। अधुना परीक्षण-समाप्तौ बहुसंख्यकानि ई-बस-यानानि मार्गेषु अवतारितानि। अनेन डीजल-तैलस्य उपरि निर्भरता न्यूनीकर्तुं निगमस्य परिचालन-व्ययं च लघूकर्तुं साहाय्यं लप्स्यते। एचआरटीसी-निगमस्य पार्श्वे साम्प्रतं प्रायः ३२०० बस-यानानि सन्ति, यानि प्रतिदिनं प्रायः ५.६० लक्ष-किलोमीटर-परिमितं मार्गं तरन्ति। निगमः प्रतिमासं डीजल-तैलस्य कृते प्रायः ३५-३६ कोटि-रूप्यकाणि व्ययीकरोति।

### हानि-युक्तेषु मार्गेषु अपि प्रबन्धनस्य दृष्टिः

ई-बस-यानानां सञ्चालनेन तैल-व्ययस्य लाभातिरिक्तं निगमः हानि-युक्तानां मार्गाणां समीक्षां करोति। प्रबन्धन-पक्षतः आवश्यकतानुसारम् एतादृशानां मार्गाणां परस्परं विलयनं (Merge) विचार्यते, येन अनावश्यक-व्ययः नियन्त्रितः भवेत् उपलब्ध-संसाधनानां च श्रेष्ठतमः उपयोगः सम्पत्स्येत।



# उच्च-नेतृत्वस्य समक्षं मुख्यमन्त्रिणा सुक्खू-महोदयेन उपस्थापितं 'शिक्षा-प्रगति-पत्रकम्' अवदत् — 'विद्यालयात् विश्वविद्यालयं यावत् परिवर्तिता शिक्षा-व्यवस्था'

हिमसंस्कृतवार्ता — नवदेहली। हिमाचलप्रदेशे विद्यालयात् आरभ्य विश्वविद्यालय-स्तरं यावत् समग्र-शिक्षा-व्यवस्थां पारम्परिक-पद्धतितः बहिर्निष्कास्य गुणवत्ता-युक्तया, पारदर्शिकतया, आधुनिक-मूलभूत-संरचनया तथा च वृत्ति-अवसरैः सह योजयितुं क्रियमाणानां परिवर्तनानां विषये मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः मङ्गलवासरे नवदेहल्यां काङ्ग्रेस-दलस्य शीर्ष-नेतृत्वस्य पुरतः विस्तृतं प्रस्तुतीकरणम् अकरोत्। मुख्यमन्त्रिणा सर्वकारस्य 'शिक्षा-प्रारूपस्य' (Education Model) प्रमुखाः उपक्रमाः विवृण्वता प्रतिपादितं यत् सर्वकारस्य लक्ष्यं केवलं विद्यालयानां विस्तारे एव नास्ति, अपि तु भावि-आवश्यकतानुसारं गुणवत्ता-पूर्णायाः शिक्षायाः प्रदाने अस्ति। अस्मिन् उपवेशने काङ्ग्रेस-दलस्य राष्ट्रिय-अध्यक्षः मल्लिकार्जुन-खरगे-महोदयः, लोकसभायां विपक्षस्य नेता राहुल-गान्धी, महासचिवः प्रियंका-गान्धी-वाड्रा तथा च काङ्ग्रेस-शासित-राज्यानां मुख्यमन्त्रिणः शिक्षा-मन्त्रिणश्च समुपस्थिताः आसन्।

### २१ तम-क्रमात् पञ्चम-क्रमे (५) सम्प्राप्ता हिमाचलस्य शिक्षा-क्रमाङ्कनम्

मुख्यमन्त्रिणः प्रस्तुतीकरणे राजकीय-विद्यालयानां सुदृढीकरणं, गुणात्मिका शिक्षा, योग्यताधारिता शिक्षक-नियुक्तिः, परीक्षा-प्रणाल्यां पारदर्शिता, अङ्कीय-शिक्षा तथा च व्यवसायोन्मुखी-पाठ्यक्रमाः प्रमुख-आधारत्वेन उपस्थापिताः। मुख्यमन्त्रिणा राष्ट्रिय-स्तरे हिमाचलस्य शिक्षा-प्रदर्शने जातस्य अभूतपूर्व-परिष्कारस्य उल्लेखः कृतः। सः विज्ञापितवान् यत् प्रदेशस्य राष्ट्रिय-क्रमाङ्कन-स्थितिः एकविंशति-क्रमात् (२१) पञ्चम-क्रमे (५) सम्प्राप्ता। सर्वकारः अधुना एनां स्थितिं श्रेष्ठतमां कर्तुं नूतन-रणनीत्या कार्यं करोति। हिमाचलस्य पूर्ण-साक्षर-राज्यत्व-प्राप्त्यनन्तरं सर्वकारस्य आगामि-लक्ष्यं शिक्षायाः गुणवत्तायाः, शिक्षण-परिणामानां छात्राणां च भविष्य-सज्जतायाः संवर्धनम् अस्ति।

### 'सीबीएसई'-सम्बद्धता राजीवगान्धी-डे-बोर्डिङ्ग-विद्यालयाश्च

सः न्यवेदयत् यत् राज्ये चयनितानां राजकीय-विद्यालयानां 'सीबीएसई'-मण्डलेन (CBSE) सह संयोजने त्वरित-गतिः दीयते। अनेन सहैव 'राजीवगान्धी-डे-बोर्डिङ्ग-विद्यालयाः' अत्याधुनिक-सुविधाभिः उत्तमाधारभूत-संरचनाभिश्च सह विकस्यन्ते। सर्वकारस्य योजना वर्तते यत् छात्रेभ्यः एकस्मिन् एव परिसरे उत्कृष्ट-शैक्षणिक-वातावरणं, क्रीडा-सुविधाः, अन्याः च सह-पाठ्यक्रम-प्रवृत्तयः समुपलब्धाः भवेयुः। मुख्यमन्त्रिणा उच्च-नेतृत्वं सूचितं यत् सर्वकारस्य उद्देश्यं केवलं पाठ्यपुस्तकीय-ज्ञान-प्रदानं नास्ति, अपि तु स्पर्धा-परीक्षाभ्यः, उच्च-शिक्षायै, उद्योग-जगतश्च परिवर्तमानाभ्यः आवश्यकताभ्यः छात्रान् सज्जीकरणम् अस्ति। शिक्षा-परिष्कारस्य अस्मिन् प्रारूपे परीक्षा-व्यवस्थां निष्पक्षां विधातुं तथा च प्रश्नपत्र-प्रकटनस्य (Paper leak) निरोधाय गृहीताः कठोराः उपायाः अपि प्रमुखतया चर्चिताः। अस्मिन् अवसरे मुख्यमन्त्रिणा सह राज्यस्य शिक्षा-मन्त्री रोहित-ठाकुरः प्राविधिक-शिक्षा-मन्त्री (Technical Education Minister) राजेश-धर्माणी च अपि समुपस्थितौ आस्ताम्।

# हिमाचल-राजनीतेः महती क्षतिः, भूतपूर्व-पर्यटन-मन्त्री दिग्गज-नेता मेजर-विजयसिंह-मनकोटिया दिवङ्गतः



हिमसंस्कृतवार्ता — काङ्गड़ा। हिमाचलप्रदेशस्य राजनीतौ महती क्षतिः सञ्जाता अस्ति। प्रदेशस्य पूर्व-पर्यटन-मन्त्री दिग्गज-नेता च मेजर-विजयसिंह-मनकोटिया-महोदयः दिवङ्गतः। हृदयाघातेन (Heart Attack) मेजर-मनकोटिया-महोदयः सप्ताशीति-वर्ष-वयसि (८७) अन्तिमं श्वासं जग्राह। पूर्वतन-काङ्ग्रेस-शासने मन्त्रित्वेन सेवारतः मनकोटिया-महोदयः हिमाचलस्य शीर्ष-नेतृषु गण्यते स्म। सः पञ्चवारं विधायकः, द्विवारं च मन्त्री अभवत्। मङ्गलवासरे प्रातःकाले काङ्गड़ा-मण्डलस्य स्वकीये पैतृक-ग्रामे 'त्यारा'-स्थाने तेन अन्तिमः श्वासः गृहीतः।सः काङ्ग्रेस-दलस्य भाजपा-दलस्य च वरिष्ठ-नेता आसीत्। २०२४ तमे वर्षे सः काङ्ग्रेस-दलात् पृथग्भूय भारतीय-जनता-पक्षे (भाजपा) सम्मिलितः जातः। मेजर-मनकोटिया-महोदयः पूर्व-मुख्यमन्त्रिणः स्व. वीरभद्रसिंहस्य प्रखर-विरोधी मन्यते स्म। २००७ तमस्य वर्षस्य मई-मासे मेजर-विजयसिंह-मनकोटिया-महोदयेन एका ध्वनि-चित्र-चक्रिका ('सीडी') विमुक्ता आसीत्, यया हिमाचलस्य राजनीति-क्षेत्रे महान् भूकम्पः (आलोडनम्) समुत्पन्नः आसीत्।

# लोकतन्त्रस्य संविधानस्य च रक्षणाय काङ्ग्रेस-दलस्य सङ्घर्षः निरन्तरं प्रवर्तिष्यते — मुख्यमन्त्री सुक्खू



**हिमसंस्कृतवार्ता — नवदेहली।**

हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः मङ्गलवासरे नवदेहल्याम् आयोजितायां काङ्ग्रेस-कार्यसमित्याः (CWC) उपवेशने समुपस्थितः अभवत्। उपवेशने तेन काङ्ग्रेस-संसदीय-दलस्य अध्यक्षा सोनिया-गान्धी-महोदया, राष्ट्रिय-अध्यक्षः मल्लिकार्जुन-खरगे-महोदयः, लोकसभायां विपक्षस्य नेता राहुल-गान्धी, महासचिवः सांसदा च प्रियंका-गान्धी-वाड्रा तथा च दलस्य अन्यैः वरिष्ठ-नेतृभिः सह भागः गृहीतः। अस्मिन् उपवेशने देशे लोकतन्त्रस्य संविधानस्य च वर्तमान-स्थितेः समुपर्यन्वेषणेन सह निर्वाचन-प्रक्रियया सम्बद्धानां विविधानां विषयाणां गम्भीरतया विचार-विमर्शः सञ्जातः।

मुख्यमन्त्रिणा सुक्खू-महोदयेन उपवेशन-सम्बन्धे स्वकीये सामाजिक-माध्यमे लिखितं यत् लोकतन्त्रस्य दृढतमः आधारः जनतायाः स्वरः (ध्वनिः) अस्ति। लोकतान्त्रिक-व्यवस्थायां प्रत्येकस्य मतदातुः विश्वासस्य रक्षणं परमावश्यकम्। सर्वेभ्यः मतदातृभ्यः स्व-मतदानोपरि पूर्णः विश्वासः भवेत् तथा च स्वकीय-प्रतिनिधेः चयनस्य साकल्येन अधिकारः प्राप्येत— एषः समेषां संयुक्तं दायित्वमस्ति।

## निर्वाचनं लोकतन्त्रस्य आधारभूता प्रक्रिया — सुक्खू-महोदयः

सः अवदत् यत् निर्वाचन-प्रक्रियां प्रति समग्रे देशे ये संशयाः उत्थिताः सन्ति, तेषां गम्भीरतया परिहारः करणीयः। निर्वाचनं लोकतन्त्रस्य मूलभूता आधार-प्रक्रिया वर्तते, अत्र च जन-विश्वासस्य रक्षणाय सर्वोच्चं महत्त्वं प्रदेयम्। मतदातुः स्व-मताधिकारोपरि तस्य निष्पक्षतायाश्च उपरि पूर्णः विश्वासः भवितव्यः।

मुख्यमन्त्रिणा सुक्खू-महोदयेन स्पष्टीकृतं यत् संविधानं देशस्य लोकतान्त्रिक-व्यवस्थायाः आधारशिला अस्ति। संविधाने प्रदत्तानाम् अधिकाराणां लोकतान्त्रिक-मूल्यानां च रक्षणं प्रत्येकस्य नागरिकस्य लोकतान्त्रिक-संस्थानानां च परमं कर्त्तव्यं विद्यते। काङ्ग्रेस-पक्षः संविधानस्य लोकतान्त्रिक-मर्यादायाश्च रक्षार्थं स्वकीय-सङ्घर्षं निरन्तरं चालयिष्यति। सः अवदत् यत् जन-अधिकारात् जन-विश्वासात् च परतरं किमपि नास्ति। लोकतन्त्रे जनतायाः स्वरस्य तस्याः मताधिकारस्य च सम्मानः सर्वोपरि भवेत्। कार्यसमिति-उपवेशने एतान् सर्वान् विषयान् आदाय दलस्य भावि-भूमिकायाः रणनीतेश्च रूपरेखा निर्धारिता।

## आगामि-विधानसभा-निर्वाचनानां सज्जायाः समीक्षा

काङ्ग्रेस-कार्यसमित्याः उपवेशने आगामि-विधानसभा-निर्वाचनानां पूर्व-सज्जायाः उपरि अपि विस्तृत-चर्चा अभवत्। विविध-राज्येषु दलीय-सङ्घटनस्य स्थितेः निर्वाचन-रणनीतेश्च समीक्षा विहिता। सहैव विपक्षीय-दलैः सह सम्भाव्य-समन्वयस्य संयुक्तायाः रणनीतेश्च विषये अपि विमर्शः जातः। उपवेशने निर्वाचन-आयोगेन सम्बद्धानाम् आक्षेपाणाम् उपरि चर्चां कुर्वद्भिः दलस्य भावि-योजनाः निश्चिताः कृताः।





# जलाप्लावन-पीडितानां साहाय्यार्थं बेल्ट्रान संस्था अग्रेसरा, मुख्यमन्त्रि-राहतकोषे पञ्चदश कोटि-रूप्यकाणि प्रदत्तानि

**प्रभावित-कुटुम्बानां साहाय्यार्थं मुख्यमन्त्रि-राहतकोषे योगदानम्; मुख्यमन्त्रिणा सम्राटचौधरीमहोदयेन कृतज्ञता ज्ञापिता**

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**

बिहारे आप्लावेन (बाढ-आपदया) संत्रस्तानां परिवाराणां साहाय्यार्थं बिहार- राज्य- इलेक्ट्रॉनिक्स- विकासनिगमः (बेल्ट्रान) अग्रेसरः अभवत्। बेल्ट्रानसंस्थायाः पक्षतः मुख्यमन्त्रि-राहतकोषे पञ्चदशकोटिः (१५ कोटि) रूप्यकाणां योगदानं समर्पितम्। मङ्गलवासरे पञ्चदश कोटि रूप्यकाणां धनादेशः (चेक) लोकसेवक-आवासे मुख्यमन्त्रिणे सम्राट-चौधरी-महोदयाय समर्पितः। मुख्यमन्त्री बेल्ट्रान्-संस्थायाः एतस्मै साहाय्याय कृतज्ञतां प्राकटयत्। सः अवदत् यत् विपदि कष्टकाले च राहतकोषस्य माध्यमेन आवश्यकतावद्भ्यः जनेभ्यः साहाय्यं प्रदातुम् इयं राशिः अतीव उपयुक्ता भविष्यति। आप्लाव-पीडितेभ्यः परिवारेभ्यः साहाय्यं दातुं राज्यसर्वकारस्य पक्षतः विविध-स्तरेषु कार्याणि क्रियन्ते।

**साहाय्यकार्येषु भविष्यति धनस्य उपयोगः**

मुख्यमन्त्रि-राहतकोषे प्राप्तायाः राशेः उपयोगः आपदया संत्रस्तानां दीनानां परिवाराणां साहाय्यार्थं करिष्यते। आप्लावस्थितौ प्रभावितानां जनानां पार्श्वे साहाय्यम् अत्यावश्यक-सामग्रीं च सम्प्रापयितुं सर्वकारतन्त्रं सक्रियं वर्तते। अस्मिन् समये संस्थाभिः सङ्घटनैश्च कृतम् आर्थिक-सहयोगं साहाय्यकार्याणां कृते अतिरिक्त-संसाधनं प्रदास्यति।

**एते अधिकारिणः उपस्थिताः आसन्**

धनादेशसमर्पणकाले सूचना-प्रौद्योगिकीमन्त्री नीतीशमिश्रः, विकास-आयुक्तः मिहिरकुमार-सिंहः, सूचना-प्रौद्योगिकी-विभागस्य सचिवः अभयकुमारसिंहः, बेल्ट्रानसंस्थायाः प्रबन्धनिदेशकः कौशलकिशोरः उपस्थिताः आसन्।

**बेल्ट्रानसंस्थया कृतं साहाय्यम्**

बिहार- राज्य- इलेक्ट्रॉनिक्स- विकासनिगमः राज्यसर्वकारस्य सूचना-प्रौद्योगिकीतन्त्रेण सम्बद्धा प्रमुखा संस्था वर्तते। आप्लावसमाने आपत्काले मुख्यमन्त्रि-राहतकोषे प्रदत्तं पञ्चदश कोटि रूप्यकाणां योगदानं पीडितकुटुम्बानां साहाय्यकार्येषु उपयोक्ष्यते।



# स्वरसाम्राज्ञी लता-मङ्गेशकर-जयंतीम् उपलक्ष्य बोकारोनगरे स्वरमयी श्रद्धाञ्जलिः

'त्वं मां एवं विस्मर्तुं न शक्नोषि...', 'पुष्पं ते प्रेषितं पत्रे...' इत्यादि गीतैः गुञ्जितं सङ्गीतमयम् आयोजनम् बोकारो। भारतरत्न-स्वरसाम्राज्ञी लता-मङ्गेशकरस्य जयन्तीम् उपलक्ष्य सोमवासरे सायंकाले बोकारोनगरस्य सेक्टर-१२ बी-स्थले सङ्गीतसन्ध्यायाः आयोजनं कृत्वा स्थानीयकलाकारैः तस्यै स्वरमयी श्रद्धाञ्जलिः समर्पिता। अस्मिन् अवसरे प्रसिद्धपार्श्वगायकस्य महेन्द्र-कपूरस्य पुण्यतिथिमपि स्मृत्वा श्रद्धाञ्जलिः अर्पिता।स्वरागिनी-म्यूजिकल-ग्रुप् इत्यस्य तत्वावधाने आयोजितस्य कार्यक्रमस्य प्रारम्भः रमण-चौधरी, गायकाः अरुण-पाठकः, सोमेश-मिश्रः, पूर्णेन्दु-कुमार-सिंहः, गायिकाः रञ्जू-सिंहः, सुनीता-गुप्ता, रञ्जना-सिन्हा, श्वेता-प्रियदर्शिनी च लता-मङ्गेशकरस्य महेन्द्र-कपूरस्य च चित्रयोः माल्यार्पणेन पुष्पार्चनेन च कृतवन्तः।

अरुण-पाठकः अवदत् यत् लता-मङ्गेशकरस्य गायनकला अनुपमा आसीत्। तस्याः स्वरमाधुर्यस्य तुलनां कश्चिदपि कर्तुं न शक्नोति। यावत् सङ्गीतं तिष्ठति, तावत् तस्याः नाम सुवर्णाक्षरैः स्मरिष्यते। महेन्द्र-कपूरस्यापि पार्श्वगायने विशिष्टं स्थानमासीत् इति सः उक्तवान्।रमण-चौधरी, सोमेश-मिश्रः, रञ्जू-सिंहादयः अपि लता-मङ्गेशकरस्य महेन्द्र-कपूरस्य च सङ्गीतक्षेत्रे योगदानं स्मृतवन्तः।कार्यक्रमे कलाकारैः लता-मङ्गेशकरस्य महेन्द्र-कपूरस्य च प्रसिद्धगीतानां सुमधुरप्रस्तुतिभिः वातावरणं सङ्गीतमयं कृतम्। अरुण-पाठकः रञ्जू-सिंहश्च युगलगीतैः श्रोतॄन् आनन्दितवन्तौ। अरुण-पाठकेन 'तुम मुझे यूँ भुला न पाओगे' इत्यादीनां गीतानां भावपूर्णा प्रस्तुतिः कृता। रमण-चौधरी, सोमेश-मिश्रः, रञ्जना-सिन्हा, सुनीता-गुप्ता, रञ्जू-सिंहादिभिः अपि विविधगीतानां कर्णप्रियाः प्रस्तुतयः प्रदत्ताः। कार्यक्रमः सर्वेषां मनांसि सङ्गीतरसेन आपूरयन् सम्पन्नः।

# बिहारराज्यस्य विद्यालयेषु शिक्षा-व्यवस्थायाः आधुनिकीकरणस्य योजना




**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, पाटलिपुत्रम्।** बिहारराज्यस्य सर्वकारीयविद्यालयेषु शिक्षाव्यवस्थां आधुनिकीं गुणवत्तापूर्णां च कर्तुं राज्यसर्वकारेण प्रयासाः तीव्रतराः कृताः सन्ति। विद्यालयेषु आधुनिकप्रौद्योगिक्याः आवश्यकसुविधानां च विस्ताराय केन्द्रसर्वकारात् विभिन्नेषु मदेषु अतिरिक्तधनराशेः उपलब्धतायै अनुरोधः कृतः अस्ति। शिक्षामन्त्री मिथिलेशतिवारी ३८१८ विद्यालयेषु सूचनासञ्चारप्रौद्योगिकी-प्रयोगशालानां स्थापनायै ९१.६३ कोटिरूप्यकाणां धनराशेः अपेक्षां प्रकटितवान्। पूर्वमेव सञ्चालितानां ७८४ आईसीटी प्रयोगशालानां कृते १८.८२ कोटिरूप्यकाणां स्वीकृतिरपि अपेक्षिता अस्ति। सर्वकारीयविद्यालयेषु डिजिटलशिक्षायाः विस्ताराय सूचना- सञ्चार- प्रौद्योगिकी- प्रयोगशालानां महत्त्वपूर्णं स्थानम् अस्ति। प्रयोगशालानां नियमित- सञ्चालनाय यथासमयं धनराशेः उपलब्धता आवश्यकम् अस्ति। तेन उपकरणानां अनुरक्षणं, तकनीकी-आवश्यकतानां पूर्तिश्च यथासमयं कर्तुं शक्यते। प्रयोगशालासम्बद्धानि अन्यानि कार्याण्यपि समये सम्पन्नानि कर्तुं शक्यन्ते। राज्यस्य १२७५ विद्यालयेषु विज्ञानप्रयोगशालानां निर्माणाय प्रस्तावितानां वैकल्पिकस्थलानां शीघ्रस्वीकृतये अनुरोधः कृतः अस्ति। स्वीकृतेः प्राप्ते सति तेषु विद्यालयेषु विज्ञानस्य प्रयोगात्मकशिक्षणाय आवश्यकस्य आधारभूतसंरचनायाः विकासस्य मार्गः प्रशस्तः भविष्यति। पीएमश्रीविद्यालयेषु २२७ अतिरिक्तकक्षाणां निर्माणमपि प्रस्तावितम् अस्ति। तदर्थम् आवश्यक्याः अतिरिक्तधनराशेः उपलब्धतायै अनुरोधः कृतः अस्ति। तदतिरिक्तं ५२५ विद्यालयेषु जीर्णशौचालयानां जीर्णोद्धारकार्यं, ८३६ विद्यालयेषु स्मार्टफलकानां परस्परसंवादी- अधिगमपट्टिकानां च स्थापनं प्रस्तावितम् अस्ति। विद्यालयेषु विद्यार्थिनां गणवेशाय अपि अतिरिक्तधनराशेः अपेक्षा कृता अस्ति।राज्ये 'सरस्वती विद्यानिकेतन' इति नाम्ना सञ्चाल्यमानाः ७०० आदर्शविद्यालयाः उत्कृष्टताकेन्द्ररूपेण विकसिताः करिष्यन्ते।प्रत्येकस्य विद्यालयस्य कृते एकः पर्यवेक्षणाधिकारी नियुक्तः भविष्यति। सः अधिकारी विद्यालयस्य शैक्षणिक- क्रियाकलापानां, आधारभूतसंरचनायाः, शिक्षणव्यवस्थायाः च निरीक्षणं करिष्यति। एतदर्थं शिक्षाविभागेन सर्वेभ्यः जिलाशिक्षाधिकारिभ्यः आवश्यकाः निर्देशाः प्रदत्ताः सन्ति। आदर्शविद्यालयेषु विद्यार्थिनां नियमितमूल्याङ्कनाय विशेषं महत्त्वं प्रदास्यते। प्रत्येकस्मिन् मङ्गलवासरे प्रत्येकं विषयस्य परीक्षणं भविष्यति। एकस्मिन् मासे चतुर्णां विषयाणां परीक्षा आयोजिता भविष्यति। अनेन विद्यार्थिनां अध्ययनप्रगतेः परीक्षासज्जतायाश्च नियमितमूल्याङ्कनं कर्तुं शक्यते।

### कक्षायां चलभाषयन्त्रस्य प्रतिबन्धः

आदर्शविद्यालयेषु शिक्षकाणां कक्षायां चलदूरभाषयन्त्रं नेतुं प्रतिबन्धः भविष्यति। शिक्षकाः स्वानि चलदूरभाषयन्त्राणि निर्धारितायां मंजूषायां स्थापयित्वा कक्षायां प्रवेशं करिष्यन्ति। अनेन ते पठनपाठनकार्ये पूर्णतया ध्यानं केन्द्रितुं शक्नुवन्ति। विद्यालयेषु स्वस्थप्रतिस्पर्धायाः भावनां प्रोत्साहयितुमपि विशेषव्यवस्था भविष्यति। उत्कृष्टप्रदर्शनं कुर्वन्तः विद्यार्थिनः कक्षानायकत्वेन चयनिताः भविष्यन्ति तथा तेभ्यः विशेषचिह्नं प्रदास्यते। शिक्षकाणां प्रोत्साहनाय 'मासस्य श्रेष्ठशिक्षकः' इति योजना प्रारप्स्यते। अस्याः योजनायाः माध्यमेन उत्कृष्टकार्यं कुर्वतां शिक्षकाणां प्रोत्साहनं भविष्यति।
आदर्शविद्यालयेषु विद्यार्थिनां क्रीडाकौशलस्य विकासाय विशेषं महत्त्वं प्रदास्यते। एथलेटिक्सक्रीडायाः अन्तर्गतं धावनं, दीर्घकूर्दनम्, उच्चकूर्दनम् इत्यादीनां क्रीडाक्रियाणाम् आयोजनं भविष्यति। अनेन अध्ययनेन सह विद्यार्थिनां क्रीडाप्रतिभायाः विकासोऽपि भविष्यति।आगामिनि ३० सितम्बरदिनांके अधिकारिणां दलं आदर्शविद्यालयानां निरीक्षणं करिष्यति। निरीक्षणकाले विद्यालयानाम् आधारभूतसंरचनायाः समीक्षा, प्रतियोगितापरीक्षाणां सज्जतायै सञ्चालितानां प्रशिक्षणकार्यक्रमाणां समीक्षा, अन्यासां शैक्षणिकव्यवस्थानां निरीक्षणं च भविष्यति।
एतदतिरिक्तम्, अधिकारिभिः आकस्मिक-निरीक्षणमपि क्रियते। अनेन विद्यालयेषु शिक्षाव्यवस्थायाः, आधारभूतसुविधानाम्, अन्यासां शैक्षणिकव्यवस्थानां नियमितनिरीक्षणं सुनिश्चितं भविष्यति।

## कठुआ-जनपदे क्षुद्रविवादानन्तरं गुलीकाप्रहारः, सीआईएसएफ-सुरक्षाभटेन सहकर्मिषु चालिताः गुलीकाः, चतुर्णां मृत्युः



हिमाचलप्रदेशस्य चम्बा-जनपदेन संलग्ने कठुआ-जनपदस्य मास्का-स्थिते 'सेवा-विद्युत्-केन्द्र-द्वितीय' इत्यस्य सीआईएसएफ-शिविरे मङ्गलवारस्य सन्ध्यायां क्षुद्रविवादानन्तरम् एकेन सुरक्षाभटेन स्वसहकर्मिष्वेव गुलीकाः चालिताः। अस्मिन् गुलीकाप्रहारे चत्वारः सीआईएसएफ-सुरक्षाभटाः पञ्चत्वं गताः। मृतेषु एकः सहायकादेशपालकः (असिस्टेंट कमाण्डेण्ट्) अपि सम्मिलितः अस्ति। मृतानां परिचयः सहायकादेशपालकः अङ्कितकुमारपाण्डेयः, उपनिरीक्षकः (एसआइ) लक्ष्मणसिंहः, आरक्षकः रफीक-अहमदः तथा आरक्षकः सन्दीपकुमारः इति रूपेण जातः। एते भटाः हिमाचलप्रदेशस्य सीमया संलग्ने बसोहली-क्षेत्रस्य मशका-ग्रामे विद्युत्-परियोजनायाः सुरक्षायां नियुक्ताः आसन्। कस्मिंश्चिद् विषये द्वयोः भटयोः मध्ये विवादः जातः। एतन्मध्ये तयोः एकेन अन्धाधुन्धं गुलीकाप्रहारः कृतः। अस्मिन् आक्रमणे चत्वारः भटाः क्षतविक्षताः अभवन्, ये प्रथमं हिमाचलप्रदेशस्य खैरी-स्थिते एनएचपीसी-चिकित्सालये नीताः। तत्र पश्चात् चतुर्णामपि मृत्युः अभवत्। सीआईएसएफ-मुख्यालयेन अस्मिन् प्रकरणे 'कोर्ट् आफ् इन्क्वायरी' (न्यायिक-अन्वेषणस्य) आदेशः दत्तः। घटनाम् एतां कृतवान् सीआईएसएफ-दलस्य मुख्य-आरक्षकः (हेड् कान्स्टेबल) अवधेशकुमारः आरक्षिभिः नियन्त्रणे (हिरासते) गृहीतः अस्ति।

## अधुना देशे कुत्रापि प्राप्स्यते आहारधान्यम्, 'एकः राष्ट्रः, एकं रेशन-पत्रम्' इत्यनेन सुगमा संजाता रेशन-व्यवस्था

राष्ट्रिय-खाद्य-सुरक्षा-अधिनियमस्य योग्यानां लाभार्थिनां कृते 'एकः राष्ट्रः, एकं रेशन-पत्रम्' (One Nation One Ration Card) योजना-माध्यमेन सम्पूर्णे देशे कुत्रापि तेषां पात्रतानुसारं रेशन-सामग्रीं स्वीकर्तुं सुविधा उपलब्धा कृता अस्ति। मण्डल-खाद्य-आपूर्ति-नियन्त्रिकया आञ्चल-कुमार्या सूचितं यत् लाभार्थी स्वस्य वर्तमानेन रेशन-पत्रेण कस्यापि 'ई-पीओएस'-सक्षम-उचितमूल्य-आपणात् स्वपात्रतानुसारं सम्पूर्णम् अथवा आंशिकं खाद्यान्नं प्राप्तुं शक्नोति। इयं सुविधा विशेषतया प्रवासि-श्रमिकेभ्यः, कर्मकरेभ्यः तथा च उद्योग-कारणात् स्वगृहात् बहिः निवसन्ति ये परिवाराः, तेषां कृते अत्यन्तोपयुक्ता अस्ति।सम्प्रति लाभार्थिभ्यः केवलं स्वस्य मूलग्रामे अथवा निर्धारिते उचितमूल्य-आपणे एव आश्रितेभ्यः भवितुम् आवश्यकता नास्ति। परिवारस्य कोऽपि जनः यदि वृत्तये (रोजगाराय) अन्यस्मिन् नगरे वा राज्ये निवसति, तर्हि सः तत्रैव स्वपात्रतानुगुणं रेशन-सामग्रीं लब्धुं शक्नोति; अपरपक्षे परिवारस्य शेषाः सदस्याः स्वस्य गृहक्षेत्रे अवशिष्ट-पात्रतायाः लाभं ग्रहीतुं शक्नुवन्ति। डीएफएससी-महोदयया कथितं यत् केन्द्रसर्वकारेण प्रवर्तितेन 'मेरा राशन' (मम रेशन) इति चलदूरभाष-अनुप्रयोगेण (मोबाइल-ऐप-माध्यमेन) लाभार्थिनः स्वस्य रेशन-पात्रताम्, अद्यतनानि विनिमय-विवरणानि (लेनदेन), आधार-संयोजनस्य स्थितिं तथा राष्ट्रिय-सञ्चारणीयतायाः (National Portability) सम्बद्धानि विवरणानि ज्ञातुं शक्नुवन्ति।

# जलाप्लावेन अतिवृष्ट्या च संत्रस्तेभ्यः कर्षकेभ्यः केन्द्रसर्वकारात् विशिष्ट-साहाय्य-सङ्कुलस्य याचना



## कर्षकेभ्यः समुचितमूल्येन समये च उर्वरक- वितरणाय निर्मातृसंस्थाभिः 'गन्तव्य- भारवहन- नियमेन' खुदरा-विक्रेतृभ्यः सम्भरण-व्यवस्थां सुदृढां विधातुम् अभ्यर्थना

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्** बिहारस्य माननीयः कृषिमन्त्री विजयकुमारसिन्हा-महोदयः राज्ये जलाप्लावेन प्रचण्ड-वृष्टिपातेन च विपद्ग्रस्तानां कर्षकाणां साहाय्यार्थं केन्द्रसर्वकारं प्रति विशिष्ट-साहाय्य-सङ्कुलस्य (विशेष-पैकेजस्य) आवश्यक-सहयोगस्य च सानुरोधम् अभ्यर्थनां कृतवान्। सः अवदत् यत् बिहारस्य वर्तमानां विपदं समीक्ष्य कर्षकेभ्यः सद्यः साहाय्येन सह आगामी-वासन्तिकशस्यर्तवे (रबी-ऋतवे) विशिष्टसहयोगस्य महती आवश्यकता वर्तते। वासन्तिक- शस्य-महाभियानस्य मङ्गलेऽवसरे स्वकीय- उद्बोधने माननीयः कृषिमन्त्री प्रावोचत् यत् बिहारस्य अष्टादशसु मण्डलेषु, चतुरशीतिषु प्रखण्डेषु, त्रिषष्ट्यधिक- षट्शतं ग्रामपञ्चायतेषु च अतिवृष्ट्या जलाप्लावेन च शस्यानां महती क्षतिः सञ्जाता। एतेषु संत्रस्तेषु क्षेत्रेषु वासन्तिकर्तौ कर्षकेभ्यः राजिकायाः, सर्षपस्य, कलायस्य च बीजानि निःशुल्कं वितरिष्यन्ते। तथैव अल्पवृष्टियुक्तेषु क्षेत्रेषु कदन्नस्य कृषिकर्मणे कर्षकाणां कृते समुचितः सहयोगः विधास्यते। सः प्रचण्डवातेन अतिवृष्टिपातेन च शस्यानां जातेन विनाशेन भारतसर्वकारं प्रति आवश्यकीं सहायतां प्रदातुं पुनः न्यवेदयत्। सः स्पष्टमकरोत् यत् बिहारस्य कृषि-पारिस्थितिकी अन्यराज्येभ्यः भिन्ना वर्तते। अतः केन्द्रसर्वकारस्य योजनासु बिहारस्य स्थानीय-परिस्थितीनाम् अनुगुणं नियमप्रतिबन्धेषु समुचिता शिथिलता दीयेत। भारतसर्वकारस्य कृषि-कृषककल्याण- मन्त्रालयस्य बिहार-कृषिविभागस्य च उच्चाधिकारिणः एकत्र समुपविश्य बिहारस्य कृषेः आव्हानानां सम्भावनानां च अनुकूलं विशेषां कार्ययोजनां निर्मेयुः।कर्षकेभ्यः समये समुचितेन च मूल्येन उर्वरक- वितरणं सर्वकारस्य अग्रिमा प्राथमिकता अस्ति इति प्रतिपादयन् कृषिमन्त्री अवदत् यत् उर्वरक-निर्मातृभिः 'गन्तव्य-भारवहन-नियमेन' आपातिविक्रेतृभ्यः (खुदरा-विक्रेतृभ्यः) उर्वरकाणां प्रेषणव्यवस्था सुदृढा प्रभावती च क्रियेत। एतदर्थं कर्षकाणां क्लेशनिवारणाय भारतसर्वकारः समुचितां शीघ्रकार्रवाईं विदध्यात्। माननीयः मन्त्री न्यवेदयत् यत् अस्य वासन्तिक- महाभियानस्य लक्ष्यं केवलं शस्योत्पादन-संवर्धनं नास्ति, अपि तु कर्षकाणाम् आय-उपार्जने वृद्धिं कृषिकर्म च अत्यधिकं लाभप्रदं विधातुम् अस्ति। बिहारे शस्य-वैविध्यं प्रोत्साहयन् सः शिम्बीधान्यं, तैलबीजं, मखान्नं, छत्रकम्, उपस्कराणि, उद्यानशस्यानां विस्तारं प्रति विशेषं ध्यानम् अददात्। सः प्रावोचत् यत् कर्षकेभ्यः श्रेष्ठगुणवत्तायुक्तानां बीजानां समये उपलब्धिः अनिवार्या वर्तते। बिहारस्य कृषि-जलवायु-अनुकूलं नूतनप्रजातीनां संज्ञानम्, शिम्बीधान्य-तैलबीजयोः गुणवत्तापूर्ण- बीजानां प्रचुरता, सङ्कर-मक्का-बीजोत्पादनाय 'उत्कृष्टताकेन्द्रस्य' संस्थापनायै केन्द्रसर्वकारात् सहयोगः प्रार्थितः।

कृषिमन्त्रिणा प्रतिपादितं यत् कर्षकाणाम् आयवृद्धये उत्पादनेन सह विपणन-व्यवस्थायाः (बाजार- व्यवस्थायाः) दृढीकरणम् अत्यावश्यकम्। बिहारस्य कृषि-विपणन-प्राङ्गणानां राष्ट्रिय-कृषिविपणेन सह संयोजनम्, कर्षक- उत्पादक-सङ्घानां विपण्या सह मेलनं सञ्चय- शीतशृङ्खला-प्रसंस्करण- मूल्यवर्धन- सुविधानां विस्ताराय केन्द्रस्य सहयोगः प्रतीक्षितः अस्ति। सः न्यवेदयत् यत् बिहारस्य विशिष्टोत्पादनानि- मखान्नं, विशिष्ट-लीचीफलं, जर्दालु-आम्रं, कतरनी-तण्डुलं च राष्ट्रिय- अन्तर्राष्ट्रिय-विपण्या सह योजयितुं विशेषाः प्रयासाः विधीयन्ते।कृषिमन्त्री अवदत् यत् कर्षक- पञ्जीकरण- व्यवस्था, कर्षक-परिज्ञान-व्यवस्था च सरला भवेत्, येन भू-अभिलेख-सम्बद्धाभिः तान्त्रिक-त्रुटिभिः कोऽपि वास्तविकः कर्षकः सर्वकारीय-योजनाभ्यः वञ्चितः न स्यात्। एतदर्थं सम्बद्ध-विभागानाम् अङ्क- तथ्यानां सुसमन्वयः अपेक्षितः।सः अवदत् यत् बिहारसर्वकारः कर्षक-कल्याणाय अहर्निशं प्रयतते। केन्द्र-राज्ययोः सुदृढ-समन्वयेन जलाप्लावेन अतिवृष्ट्या च सन्तप्तेभ्यः कर्षकेभ्यः त्राणं प्रदास्यते, वासन्तिक-ऋतौ च समग्र- कृषि-क्रियाकलापेभ्यः नूतना गतिः सञ्चारयिष्यते।

अन्ते कृषिमन्त्री प्रतिपादितवान् यत् 'वासन्तिक-महाभियानं' वस्तुतः कर्षकाणाम् आयवर्धनस्य, कृषिकर्मणः लाभप्रदतायाः, बिहारस्य कृषेः आधुनिक- कर्षकाभिमुखकरणस्य च महनीयम् आन्दोलनं वर्तते। अस्माकं दृढः सङ्कल्पः यत् कर्षकः न केवलं प्रचुरां शस्यसम्पदं प्राप्नुयात्, अपि तु स्वश्रमस्य सर्वोत्कृष्टं मूल्यमपि लभेत।



## युनेस्को-संस्थायाः अस्थायी-सूच्यां भारतस्य पञ्च नूतन-स्थलानि, शृङ्खला तथा च अन्ताराष्ट्रिय-प्रस्तावः सम्मिलिताः

युनेस्को-संस्थायाः अस्थायी-सूच्यां भारतस्य पञ्च नूतन-स्थलानि, शृङ्खला तथा च अन्ताराष्ट्रिय-प्रस्तावः सम्मिलिताः कृताः सन्ति। अनेन भारतस्य स्थानानां सङ्ख्या संवर्ध्य अष्टसप्ततिः (78) संजाता।नवीन-स्थलेषु बाघ-गुहा-चित्राणां बौद्ध-भित्ति-चित्रकला, चम्बल-उपत्यकायाः मन्दिर-समूहः, गुप्त-कालस्य उदयगिरि-गुहाः तथा च गिन्नौरगढस्य जन जातीय-परम्परा (विरासतः) सम्मिलिताः सन्ति।अस्मिन् 'सत्याग्रह-स्थलम्' अपि सम्मिलितम् अस्ति, यत् भारतं दक्षिण-आफ्रिका-देशं च योजयन्त्याः शृङ्खला-श्रेण्याः अन्ताराष्ट्रिय-प्रस्तावः वर्तते।एकेनानेक-माध्यम-सन्देशेन (सोशल-मीडिया-पोस्ट्) संस्कृति-पर्यटन-मन्त्री गजेन्द्रसिंह-शेखावतः अकथयत् यत् एतानि नूतनानि स्थलानि भारतस्य परम्परायाः (विरासतस्य) असाधारण-विविधतां प्रदर्शयन्ति।श्रीशेखावतः अवदत् यत् इयं प्रगतिः प्रधानमन्त्रिणः नरेन्द्रमोदिनः भारतस्य सभ्यता-परम्परां वैश्विक-मञ्चे संरक्षयितुं, सुरक्षितां विधातुं तथा च प्रदर्शयितुं यः दृष्टिकोणः अस्ति, तं प्रतिबिम्बयति।

## एन.आई.एफ.टी. इत्यनेन ४८तमे (48th) विश्व-कौशल-स्पर्धायां शाङ्घाई २०२६ मध्ये द्वे रजतपदके एकं च उत्कृष्टता-पदकं जितम्

राष्ट्रिय-फैशन-प्रौद्योगिकी-संस्थानेन (एन.आई.एफ.टी.) अद्यतनकाले चीने सम्पन्नायां ४८तमे विश्व-कौशल-स्पर्धायां (वर्ल्ड-स्किल्स्-शंघाई २०२६) द्वे रजतपदके एकं च उत्कृष्टता-पदकं (मेडलियन् फॉर एक्सीलेन्स) विजितम्।एन.आई.एफ.टी.-संस्थानस्य प्रतिभागिनः 'फैशन-टेक्नोलॉजी', 'डिजिटल-इण्टरएक्टिव-मीडिया-डिजाइन', 'रिटेल-सेल्स' तथा च 'विजुअल-मर्चेंडाइजिंग' इति चतसृष्वपि विधासु उत्कृष्टं प्रदर्शनम् अकुर्वन्।वस्त्र-मन्त्रालयेन सूचितं यत् एतत् संस्थानस्य सृजनशीलतायाः, 'डिजिटल'-क्षेत्रस्य तथा च खुदरा-कौशल-क्षेत्रेषु फैशन-शिक्षायाः वर्धमानां भूमिकाम् उपदर्शयति। अस्मिन् मासे त्रयोविंशति(२३)तः षड्विंशति(२६)दिनाङ्कं यावत् आयोजितायाम् अस्यां स्पर्धायां चतुष्षष्टि(६४)-कौशल-श्रेणीषु प्रायः अष्टषष्टि(६८)-देशेभ्यः क्षेत्रेभ्यश्च १४००-अधिकैः युवा-प्रतिभागिभिः सहभागिता कृता।एतासु सर्वासु स्पर्धासु त्रिषष्टि(६३)-कौशल-श्रेणीषु सप्तति(७०)-युव-प्रतिभागिनाम् अद्ययावत् बृहत्तमेन दलेन सह भारतेन षट् (६) रजतपदकानि विंशतिः (२०) उत्कृष्टता-पदकानि च विजित्य दशमं (१०) स्थानं प्राप्तम्।

# महावीरमन्दिरेऽपि प्रतिवर्षमिव सज्जयिष्यते मातुः भव्यं राजसभा

# भव्यस्य त्रिविम (3D) मण्डपस्य निर्माणं प्रचलति




## नवरात्रोत्सवं लक्षीकृत्य विविधानाम् आयोजनानां सज्जा प्रारब्धा।

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

शारदीय-नवरात्रोत्सवं लक्षीकृत्य राजधानी-पटनानगरस्य प्रसिद्धे महावीरमन्दिरे सज्जा तीव्रा वर्तते। प्रतिवर्षमिव अस्मिन् वर्षेऽपि मन्दिरपरिसरे मातुः भव्यः दरबारः सज्जयिष्यते। त्रिविम-मण्डपस्य (3D-मण्डपस्य) निर्माणकार्यम् आरब्धं वर्तते, यत्र मातुः भव्या प्रतिमा स्थापयिष्यते। महावीरमन्दिरपरिसरे दुर्गापूजायाः आयोजनम् आरम्भादेव भवति। अस्य प्रारम्भः महावीरमन्दिरस्य संस्थापकसचिवैः पद्मश्रीः आचार्य-किशोरकुणालमहोदयैः कारितः आसीत्। ततः आरभ्य मन्दिरप्राङ्गणे निरन्तरं दुर्गापूजायाः आयोजनं भवति। महावीरमन्दिरे दुर्गापूजां द्रष्टुं जनाः स्वपरिवारैः बालकैश्च सह सुदूरात् आगच्छन्ति मन्दिरे च बहुकालं यावत् तिष्ठन्ति।

### श्रद्धालूनां महत्याः सम्मर्दस्य सम्भावना

नवरात्रोत्सवे महावीरमन्दिरे भक्तानां महती सङ्ख्या समागच्छति। एतत् दृष्ट्वा मन्दिरप्रबन्धनेन जनसम्मर्द-नियन्त्रणार्थं, सुचारु-दर्शनव्यवस्थायाः कृते, अन्यासां चावश्यकीनां सुविधानां कृते व्यवस्था कृता अस्ति। अस्मिन् अवसरे मन्दिरपरिसरे एकम् अद्वितीयं धार्मिकम् आध्यात्मिकं च वातावरणं परिलक्षितं भविष्यति। श्रीमहावीरस्थान-न्याससमित्याः सचिवः सायण कुणालः अवदत् यत् महावीरमन्दिरे दुर्गापूजायाः आयोजनम् आरम्भादेव प्रचलति। पूज्यैः पितृचरणैः अस्य शुभारम्भः कृतः आसीत्। दुर्गापूजायाम् अत्र मण्डपं प्रतिमां च द्रष्टुं भक्तानां महती भीडः भवति, या च मध्यरात्रं यावत् तिष्ठति। अस्मिन् वारे भव्यस्य मण्डपस्य निर्माणं क्रियते।

### सनातनसंस्कृतौ नवरात्रस्य महत्त्वम्

सनातनधर्मे नवरात्रम् एकं प्रमुखं पर्व वर्तते। 'नव' इत्युक्ते नव, 'रात्रि' इत्युक्ते च निशा। एतेषु नवसु दिनेषु भगवत्याः दुर्गायाः नवस्वरूपाणां विधिवत् आराधनं क्रियते। शारदीयनवरात्रम् आश्विनमासस्य शुक्लपक्षस्य प्रतिपत्तिथिम् आरभ्य नवमीं यावत् प्रचलति, दशमे दिवसे च विजयादशमी (दशहरा) आचर्यते। एतत् पर्व केवलं पूजापाठपर्यन्तं सीमितं नास्ति, अपि तु मानवस्य अन्तः स्थितायाः नकारात्मकतायाः, अहङ्कारस्य, क्रोधस्य, लोभस्य, दुर्विचाराणां चोपरि विजयप्राप्तये प्रेरयति। नव दिनानि यावत् संयमेन, उपवासेन, सात्त्विकाहारेण, प्रार्थनया, साधानया च जनः आत्मनियन्त्रणं मानसिकशान्तिं च प्राप्नोति।

### विशेषपूजायाः अनुष्ठानस्य च कार्यक्रमः

**नवरात्रोत्सवे प्रमुखाः कार्यक्रमाः एवं सन्ति-**

११ अक्तूबर (रविवासरः)- प्रतिपत्तिथौ कलशस्थापनेन सह नवरात्रस्य शुभारम्भः भविष्यति।

१७ अक्तूबर (शनिवासरः)- सप्तम्यां तिथौ दर्शनाय मातुः कपाटम् उद्घाटयिष्यते।

१८ अक्तूबर (रविवासरः)- महाष्टमी।

१९ अक्तूबर (सोमवासरः)- नवम्याः पावनपर्वणि विशेषहवनस्य आयोजनं भविष्यति।

२१ अक्तूबर (बुधवासरः)- विजयादशमी।

# 'प्रगति-पञ्चाशत्' अभियाने पाटलिपुत्रं गयाक्षेत्रं च सम्मिलितम्; नैर्मल्यक्षेत्रे स्थास्यति नव्यः प्रतिमानः






## "स्वच्छतायाः आदर्शप्रतिरूपे भविष्यतः पाटलिपुत्र- गयाक्षेत्रे"- नीतीश मिश्रः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

भारतसर्वकारस्य आवासन-नगरीयकार्य-मन्त्रिणः मनोहरलालखट्टर-महोदयस्य अध्यक्षतायाम् अद्य 'स्वच्छ- भारत- अभियानस्य' आधारेण 'प्रगतिपञ्चाशत्' इत्याख्यस्य राष्ट्रिय-कार्यक्रमस्य भव्यः शुभारम्भः कृतः। अस्मिन् आयोजने बिहारसर्वकारस्य नगरविकास-आवासन-विभागस्य मन्त्रिणा नीतीशमिश्रमहोदयेन संजाल- माध्यमेन भागः गृहीतः। विभागीयमन्त्रिणा नीतीशमिश्रेण ज्ञापितं यत् 'प्रगति- पञ्चाशत्' योजनायाः अन्तर्गतं समग्रदेशात् पञ्चाशत् नगराणि चयनितानि सन्ति, येषु बिहारस्य ऐतिहासिकं पाटलिपुत्रं तीर्थप्रवरं गयाक्षेत्रं चापि स्थानं प्राप्तवन्तौ। अस्याः दूरगामिन्याः योजनायाः प्रमुखं लक्ष्यं चयनितेषु नगरेषु स्वच्छताव्यवस्थां सुदृढां कार्यक्षमां च विधातुं, नैर्मल्यक्षेत्रे नूतनोन्मेषाणाम् अत्याधुनिकप्रविधीनां च सर्वोत्कृष्टं क्रियान्वयनं संवर्धयितुं वर्तते।मन्त्री प्रतिपादितवान् यत् यशस्विनः प्रधानमन्त्रिणः नरेन्द्रमोदीमहोदयस्य 'स्वच्छ- स्वस्थ- विकसित- भारतम्' इति पावनसङ्कल्पं, माननीयस्य मुख्यमन्त्रिणः सम्राटचौधरीमहोदयस्य 'स्वच्छ- सुन्दर- आधुनिक- बिहारम्' इति दिव्यदृष्टिं साकारीकर्तुं 'प्रगति-पञ्चाशत्' योजना एका दृढा आधारशिला वर्तते। अस्मिन् महनीय-अभियाने पाटलिपुत्रस्य तथा मोक्षदायिनः गयाक्षेत्रस्य चयनं बिहारवासिनां कृते महतः गौरवस्य स्वाभिमानस्य च विषयः अस्ति। राज्यसर्वकारः अनयोः द्वयोः नगरयोः समग्रस्वच्छतां, घन-अपशिष्ट-प्रबन्धनं, प्रयुक्तजलशोधनं, नव्यतन्त्रज्ञानस्य विनियोगं, जनसामान्यस्य सक्रिय-सहभागितां प्रभावशालिनीं विधाय, एते द्वे अपि नगरे स्वच्छतायाः क्षेत्रे देशे 'उत्कृष्ट-आदर्श-नगररूपेण' प्रतिष्ठापयितुं बद्धपरिकरः अस्ति। मन्त्री प्रावोचत् यत् 'स्वच्छ-भारत-अभियानम् (नगरीयम् २.०)' इत्यस्य चरणे चतुर्विंशति- राज्यानां ५० नगराणि अभिज्ञातानि। एतानि सर्वाणि नगराणि देशस्य अवशिष्ट-नगराणां कृते नैर्मल्यस्य दीपस्तम्भरूपेण पथप्रदर्शकानि भविष्यन्ति। एतानि नगराणि नित्यनैमित्तिक-स्वच्छताकार्याणाम् अतिक्रम्य, स्वच्छतायाः शाश्वत- सर्वोच्चमानकान् संवर्धयिष्यन्ति। सः अग्रे अवदत् यत् अस्य कार्यक्रमस्य माध्यमेन उभयोः नगरयोः स्वच्छतासम्बद्धानाम् आह्वानानां समूल-निराकरणाय स्थानिकस्तरे अभिनवप्रयासाः प्रोत्साहिष्यन्ते। अनेन सहैव स्वच्छ- स्वस्थ- नगरीय- पर्यावरणस्य निर्माणाय विविधानां सामाजिकसंस्थानां प्रबुद्ध-नागरिकाणां च सहकारः सुनिश्चितः विधास्यते।मन्त्रिणा न्यवेदयत् यत् बिहारस्य प्रमुखकेन्द्रयोः चयनं राज्ये प्रचलद्भ्यः नगरविकास- नैर्मल्य- प्रयासेभ्यः नवां गतिं प्रदास्यति। अनेन द्वयोः तीर्थनगरयोः स्वच्छतासम्बद्धानां नवीन-पद्धतीनां प्रयोगे, नागरिकाणां कृते सर्वोत्कृष्ट- नागरिक- सुविधानां प्रदाने महती सहायता लप्स्यते।असौ स्पष्टीकृतवान् यत् अस्याम् आवलौ राष्ट्रस्य प्रमुखाणि महानगराणि, सांस्कृतिक-गौरवयुक्तानि क्षेत्राणि, विश्वविख्यातानि पर्यटनस्थलानि, आर्थिक- वाणिज्य- केन्द्राणि समाविष्टानि सन्ति। अस्य मूलं ध्येयं नगरीय-शुचितायां, घनावकर- निस्तारणे, दूषितजलप्रबन्धने, स्वच्छता- व्यवस्थापने, व्यापक-नागरिक-सहभागितायां स्पष्टं प्रत्यक्षं च युगान्तकारी-परिवर्तनम् आनयनम् अस्ति।

# ‘प्रधानमन्त्री- साहित्यकार- गौरवसम्मानेन’ विभूषिताः बिहारस्य त्रिषष्टिः (६३) हिन्दी- सेविनः

## मन्त्री अवदत्- “२०४७ तमवर्षपर्यन्तं भारतं भविष्यति विश्वस्य महाशक्तिः, पुनः प्राप्स्यति ‘विश्वगुरुः’ इति स्थानम्”




**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्** आगामिनि २०४७ तमे वर्षे, यदा वयं स्वस्वातन्त्र्यस्य ‘शताब्दी-वर्षम्’ आचरिष्यामः, तदा भारतं विश्वस्य महाशक्तिः सञ्जातं भविष्यति। ‘विश्वगुरुः’ इति स्वस्य पुरातनं स्थानं च पुनः प्राप्स्यति। विकसितभारतस्य निर्माणे साहित्यकाराणां भूमिका सर्वतो महत्त्वपूर्णा भविष्यति। एतानि वचनानि मङ्गलवासरे बिहार-हिन्दी- साहित्य- सम्मेलने ‘एजुकेशनल रिसर्च एण्ड डेवलपमेण्ट इन्स्टीट्यूट’ इत्यस्याः संस्थायाः तत्त्वावधाने, भारतस्य प्रधानमन्त्रिणः नरेन्द्रमोदिनः जन्मदिवस-सङ्कल्प- समारोहरूपेण आयोजितायाः विचारगोष्ठ्याः ‘प्रधानमन्त्री- साहित्यकार- गौरव-सम्मान- समारोहस्य’ च उद्घाटनं कुर्वता बिहारस्य कला-संस्कृतिमन्त्रिणा डॉ. प्रमोदकुमार-चन्द्रवंशी- महोदयेन उक्तानि। सः सम्भावितेभ्यः साहित्यकारेभ्यः अभिनन्दनं व्याहृत्य अवदत् यत् भारतस्य प्रधानमन्त्रिणः दृष्टौ कला साहित्यं च विशेषप्राथमिकतायां स्तः। अद्यतनकाले एव सः भारतस्य षट्त्रिंशतः (३६) भाषाणां कवीन् साहित्यकारांश्च विशिष्टाभरणैः विभूषितवान्। सम्मेलनस्य अध्यक्षः डॉ. अनिलसुलभः स्व-अध्यक्षीय- भाषणे अवदत् यत् भारतस्य दृष्टिः सर्वदैव ‘वसुधैव कुटुम्बकम्’ इत्याकारा आसीत्। वयं समग्रं भूमण्डलमेव स्वपरिवारं मन्यामहे। अस्माकं संस्कृतिः अस्मान् न केवलं समग्र-मानवसमाजम्, अपि तु प्राणिमात्रं प्रति स्नेहं कर्तुं शिक्षयति। अस्माकम् एतेनैव ज्ञानेन अस्मान् विश्वगुरुपदे आसीनं कृतम् आसीत्। यदा वयं स्वभाषातः संस्कृतेश्च विमुखाः अभवाम, तदा गुरुपदात् च्युताः अभवाम। अधुना भारतं पुनः स्वसंस्कृतिं ज्ञानपरम्परां च प्रति प्रत्यावृत्तम्, अतः निश्चयेनैव पुनः गुरुपदं प्राप्तुं सफलं भविष्यति विश्वं च सन्मार्गे नेष्यति।

बिहार-व्यापार-आयोगस्य अध्यक्षः सुरेशरुङ्गटा, भारतीय-चिकित्सा-सङ्घस्य पूर्व-अध्यक्षः डॉ. सहजानन्दप्रसादसिंहः, सुप्रसिद्धः नेत्ररोगविशेषज्ञः डा. सत्यप्रकाशतिवारी, उद्योगपतिः साहित्यकारश्च राकेशमिश्रः, अभियन्ता अशोककुमारः, जयशङ्करशर्मा, सुनीलकुमारसिन्हा, नित्यानन्दशर्मा, भानुप्रतापसिंहः, नरेशमहतो, अशोकपाठकः, सुन्दरकान्तचौधरी च स्वविचारान् प्राकटयन्। अतिथीनां स्वागतं संस्थायाः अध्यक्षेण डा. विनोदशर्मणा, कृतज्ञता-ज्ञापनं च विधिवेत्रा डा. कौशलेन्द्रनारायणेन कृतम्। मञ्चसञ्चालनं जनार्दनशर्मा- ‘जोगी’ महोदयेन विहितम्।

अस्मिन् अवसरे वरिष्ठसाहित्यकारः पूर्वकुलपतिश्च अरविन्दकुमारः, सुरेशरुङ्गटा, प्रो. शारदाचरणः, उदयनारायणसिंहः, भगवतीप्रसादद्विवेदी, भावनाशेखरः, राकेशमिश्रः, आराधनाप्रसादः, डॉ. पूनमानन्दः, डॉ. पुष्पाजमुआरः, डॉ. सुधासिन्हा, डॉ. विद्याचौधरी, सङ्गीतामिश्रः, कमलकिशोरवर्मा ‘कमलः’, सुजातामिश्रा, डॉ. रेखामिश्रा, डॉ. तलतपरवीनः, इन्दु-उपाध्यायः, शुभचन्द्रसिन्हा, डॉ. एम. के. मधुः, डॉ. सुमेधापाठकः, प्रीतिसुमनः, पं. गणेशझा, डॉ. ऋचावर्मा, अभियन्ता अशोककुमारः, बाँकेबिहारीसावः, डॉ. विद्याचौधरी, डॉ. प्रतिभारानी, जयप्रकाशपुजारी, श्रीकान्तव्यासः, डॉ. शालिनीपाण्डेया, डॉ. मनोजगोवर्धनपुरी, डॉ. सुषमाकुमारी, डॉ. अर्चनात्रिपाठी, अभियन्ता आनन्दकिशोरमिश्रः, प्रो. दीपककुमारः, डॉ. पङ्कजप्रियम, अरुणकुमारश्रीवास्तवः, दिनेश्वरलालः ‘दिव्यांशुः’, सञ्जयचेसियारः, सिमरनसिंहः, डॉ. मुनीकुमारी, नित्यानन्दशर्मा, कल्पनासिंहः, सुनीतारञ्जनः, कृष्णरञ्जनसिंहः इत्यादयः त्रिषष्टिः (६३) हिन्दीसेविनः ‘प्रधानमन्त्री- साहित्यकार-गौरवसम्मानेन’ विभूषिताः।

# विनोबाभावे- विश्वविद्यालयस्य संस्कृतविभागे वाल्मीकि-रामायणे ‘शत्रुज्ञेयम्’ इति विषये विशिष्टव्याख्यानमायोजितम्



**हिमसंस्कृतवार्ताः- प्रज्ञा द्विवेदी, हजारीबागः झारखण्डः।** विनोबाभावे- विश्वविद्यालयस्य हजारीबागस्य स्नातकोत्तर- संस्कृतविभागेन आयोजितायाः द्विदिवसीय- व्याख्यानमालायाः प्रथमदिवसे मङ्गलवासरे आर्यभट्टसभागारे ‘वाल्मीकिरामायणे शत्रुज्ञेयम्’ इति विषये व्याख्यानस्य आयोजनं कृतम्। कार्यक्रमस्य अध्यक्षतां विश्वविद्यालयस्य कुलपतिः प्रो. चन्द्रभूषणशर्मा अकरोत्। मुख्यवक्तृरूपेण उत्तरप्रदेशस्य गोरखपुरात् समागतः डॉ. योगेन्द्रकुमारः विषयमधिकृत्य स्वकीयम् व्याख्यानं प्रस्तुतवान्। कार्यक्रमस्य शुभारम्भः सरस्वतीवन्दनया अभवत्। स्वकीयव्याख्याने डॉ. योगेन्द्रकुमारेण वाल्मीकिरामायणस्य विविधप्रसङ्गानां माध्यमेन शत्रोः सम्यग्ज्ञानं रणनीतेः सुरक्षायाश्च महत्त्वपूर्णम् आधारत्वेन प्रतिपादितम्। तेन रामेण लङ्कायाः दुर्गव्यवस्था, सेना, सुरक्षाव्यवस्था, सैनिकानां दिनचर्या, नेतृत्वम्, संसाधनानि, विविधप्रकारकाणि यानानि च अधिकृत्य सूचनाप्राप्तेः प्रसङ्गाः प्रस्तुताः। तेन प्रतिपादितं यत् तथैव रावणोऽपि स्वकीयौ गुप्तचरौ शुकसारणौ माध्यमीकृत्य रामस्य सेनायाः, प्रमुखयोद्धॄणां, नेतृत्वस्य, सैन्यसामर्थ्यस्य, सुरक्षाव्यवस्थायाः, सेतुनिर्माणसामर्थ्यस्य, रणनीतिक- योजनानां च विषये सूचनाः प्राप्नोति। अस्मिन् सन्दर्भे तेन स्पष्टं कृतं यत् कस्यापि महत्त्वपूर्णकार्यस्य रणनीतेर्वा पूर्वं कालस्य, स्थानस्य, परिस्थितेः, सामर्थ्यस्य संसाधनानां च सम्यग्ज्ञानम् अत्यावश्यकम् अस्ति। मुख्यवक्त्रा शोधार्थिनां विद्यार्थिनां च भूमिकायामपि विशेषः बलः प्रदत्तः। तेन उक्तं यत् ये शोधकर्तारः विशेषज्ञाश्च कस्यचित् विषयस्य गहनमध्ययनं कुर्वन्ति, ते तस्मिन् क्षेत्रे विशिष्टज्ञानं धारयन्ति। अतः राष्ट्रसुरक्षायाः सहितं विविधक्षेत्रेषु तेषां शोधस्य, अनुभवस्य, परामर्शस्य च उपयोगः करणीयः। तेन विद्यार्थिनः अध्ययन-अनुसन्धानयोः तथा राष्ट्रहितसम्बद्धेषु कार्येषु सक्रियभागग्रहणाय प्रेरिताः। स्वकीयव्याख्यानस्य समापनसमये डॉ. योगेन्द्रकुमारेण ‘वसुधैव कुटुम्बकम्’ इति भावनायाः महत्त्वं प्रतिपादितम्। तेन शान्तेः, सहयोगस्य, परस्परसौहार्दस्य च सन्देशः प्रदत्तः। ज्ञानस्य, अनुसन्धानस्य, सामूहिकप्रयत्नानां च माध्यमेन राष्ट्रस्य सुरक्षायै प्रगत्यै च कार्यं कर्तुं तेन आह्वानं कृतम्। ‘वसुधैव कुटुम्बकम्’ इति सन्देशेन तेन स्वकीयव्याख्यानस्य समापनं कृतम्।

व्याख्याने सन्तकोलम्बामहाविद्यालयस्य, के. बी. महिला-महाविद्यालयस्य, विभिन्नसंस्थानानां च विद्यार्थिनः, शोधार्थिनः, अन्ये च शैक्षणिकवर्गस्य सदस्याः उपस्थिताः आसन्। ते सर्वे विषयसम्बद्धस्य व्याख्यानस्य लाभम् अलभन्त।

अस्मिन् अवसरे विश्वविद्यालयस्य कुलपतये प्रो. चन्द्रभूषणशर्मणे आभारः प्रकटितः यत् विश्वविद्यालये देशस्य विभिन्नेभ्यः प्रदेशेभ्यः विद्वांसः शिक्षाविदश्च आमन्त्र्य विद्यार्थिभ्यः तेषां ज्ञानस्य अनुभवस्य च लाभं प्राप्तुम् अवसराः प्रदीयन्ते। स्नातकोत्तरसंस्कृतविभागस्य विभागाध्यक्षायै डॉ. अञ्जुम आरायै अपि कार्यक्रमस्य आयोजनस्य शैक्षणिकगतिविधीनां च कृते आभारः प्रकटितः। मञ्चसञ्चालनं मनीषया कृतम्। विषयप्रवेशं संस्कृतविभागस्य पूर्वविभागाध्यक्षः डॉ. नकुलपाण्डेयः कृतवान्। कार्यक्रमस्य अन्ते धन्यवादज्ञापनं डॉ. एच. ज़ेड. हक इत्यनेन कृतम्। तेन मुख्यवक्त्रे, विश्वविद्यालयप्रशासने, विभागाध्यक्षायै, शिक्षकगणेभ्यः, शोधार्थिभ्यः उपस्थितेभ्यश्च विद्यार्थिभ्यः आभारः प्रकटितः। कार्यक्रमस्य अन्ते राष्ट्रगानं सम्पन्नम्।

# अङ्गणस्य मिलनम्- शिशूनाम् अन्नप्राशनं, महिलानां सीमन्तोन्नयनं, लाभार्थिभ्यः धनादेशाः




**मुख्यमन्त्रिणा सम्राटचौधरी-महोदयेन फुलवारीशरीफ- नगरात् राज्यव्यापि-कार्यक्रमस्य शुभारम्भः कृतः, अङ्गणवाडी-केन्द्राणां सुविधानां निरीक्षणं कृतम्**

हिमसंस्कृतवार्ताः राघव नाथ झा, पाटलिपुत्रम्

फुलवारीशरीफ- उच्चविद्यालयपरिसरे स्थिते अङ्गणवाडी-केन्द्रे (सङ्ख्या-१३७) मङ्गलवासरे राज्यव्यापिनः 'अङ्गणस्य मिलनम्' (आंगन का मिलन) इति कार्यक्रमस्य आयोजनम् अभवत्। मुख्यमन्त्री सम्राटचौधरीमहोदयः दीपं प्रज्वाल्य कार्यक्रमस्य शुभारम्भम् अकरोत्। अस्मिन् अवसरे सः अङ्गणवाडी-केन्द्रस्य बालकैः सेविकया च सह सम्भाषणं कृत्वा केन्द्रे उपलब्धानां सुविधानां सञ्चालितानां गतिविधीनां च विवरणम् अगृह्णात्। मुख्यमन्त्री बालकैः सह तेषाम् अध्ययनविषये दैनिकगतिविधिषु च चर्चां कृतवान्। शिशवः कविताम् अश्रावयन् स्वपरिचयं च अददुः। मुख्यमन्त्री बालानाम् उत्साहवर्धनं कृत्वा तेभ्यः मिष्टान्नम् अवतरत्।

## कन्या- उत्थान- मातृवन्दना- योजनयोः लाभार्थिभ्यः धनादेशाः

कार्यक्रमे मुख्यमन्त्री समाजकल्याण-विभागेन समेकित- बालविकास- सेवानिदेशालयेन च प्रदर्शितान् विविधान् आपणान् अपश्यत्। सः 'मुख्यमन्त्री- कन्या- उत्थान- योजनायाः' 'प्रधानमन्त्री- मातृवन्दना- योजनायाः' च लाभार्थिभ्यः साङ्केतिक-धनादेशान् समर्पयत्। मुख्यमन्त्रिणा महिलानां सीमन्तोन्नयनं (गोदभराई) कारितं शिशूनां च अन्नप्राशनं कारितम्। अङ्गणवाडी- सेविकाभ्यः, सहायिकाभ्यः, आशा-भगिनीभ्यश्च प्रशंसापत्राणि प्रदाय ताः सम्मानीयन्ते स्म। लाभार्थिभ्यः पौष्टिक-सामग्री-सम्पुटम् (किट्) अपि वितरितम्। अस्मिन् अवसरे 'सुपोषित-शैशवस्य पाकशाला' (सुपोषित बचपन की रसोई) इत्याख्यायाः पुस्तिकायाः विमोचनम् अभवत्।

## लाभार्थिनः स्वानुभवान् प्राकटयन्

'अङ्गणस्य मिलनम्' इति कार्यक्रमे मुख्यमन्त्री लाभार्थिभिः सह प्रत्यक्षं संवादम् अकरोत्। प्रधानमन्त्री- मातृवन्दना-योजनायाः मुख्यमन्त्री-कन्या- उत्थान- योजनायाश्च लाभार्थिनः योजनाभ्यः प्राप्तायाः आर्थिक-सहायतायाः तथा अङ्गणवाडी-केन्द्रेभ्यः लभ्यमानानां सेवानां विषये स्वानुभवान् अवदन्। लाभार्थिनः अकथयन् यत् योजनाभ्यः लब्धस्य धनस्य उपयोगः पोषणे, आहारे, स्वास्थ्य- सम्बन्धि- आवश्यकतानां पूर्तये च क्रियते। अङ्गणवाडीकेन्द्रेषु बालानां लसिकीकरणं (टीकाकरणम्), भारस्य दैर्घ्यस्य च निरन्तरं पर्यवेक्षणं, पोषण-सम्बन्धि-सेवाः च प्रदीयन्ते।

एकेन लाभार्थिना अङ्गणवाडी-केन्द्रेषु बालकेभ्यः क्रीडनकानां व्यवस्थां सुदृढां कर्तुं मुख्यमन्त्रिणे परामर्शः दत्तः।

## मुख्यमन्त्री अवदत्- सर्वकारः युष्माकं द्वारं प्रापयति साहाय्यम्

मुख्यमन्त्री सम्राटचौधरीमहोदयः अवदत् यत् सर्वकारः महिलाभ्यः बालेभ्यश्च योजनानां लाभं प्रापयितुं तेषां द्वारपर्यन्तं गच्छति। सः लाभार्थिभ्यः स्थानिकनागरिकेभ्यश्च अङ्गणवाडी-केन्द्राणां व्यवस्थासु सुधारार्थं परामर्शान् दातुम् आह्वानम् अकरोत्।सः अकथयत् यत् प्रसवपूर्वं प्रसवपश्चात् च मातृभ्यः बालकेभ्यश्च श्रेष्ठाः सुविधाः दातुं सर्वकारः निरन्तरं प्रयतते। येषाम् अङ्गणवाडी-केन्द्राणां स्वकीयम् भवनं नास्ति, तत्र भवननिर्माणाय अपि प्रयासाः भविष्यन्ति। मुख्यमन्त्री न्यवेदयत् यत् माता शिशुश्च उभौ स्वस्थौ भवेताम्, बालकेभ्यः च गुणात्मिका प्रारम्भि-शिक्षा पर्याप्तं पोषणं च लभेत, इत्येव सर्वकारस्य ध्येयम्। सः अङ्गणवाडी-सेविकानां सहायिकानां च सेवाभावस्य प्रशंसां कृतवान्।

## राज्ये प्रायः १.१५ लक्षं सेविका- सहायिकाः कार्यरताः

मुख्यमन्त्री अवदत् यत् राज्ये प्रायः १.१५ लक्षं परिमिताः अङ्गणवाडी-सेविका-सहायिकाः बालानां परिवाराणां च सेवारताः सन्ति। सर्वेषु अङ्गणवाडीकेन्द्रेषु बालकेभ्यः नियमेन पौष्टिकाहारः, फलानि, दुग्धं च प्रदातुं ध्यानं दीयते। सः न्यवेदयत् यत् शिशूनां नियमेन अङ्गणवाडीकेन्द्रैः सह संयोजनं तेभ्यः च पर्याप्तपोषणप्रदानम् आवश्यकं वर्तते। बालकाः सबलाः भविष्यन्ति तर्हि राज्यं देशश्च सबलः भविष्यति। ग्रामस्य सर्वान् लघुशिशून् अङ्गणवाडीकेन्द्रैः संयोजयितुं मुख्यमन्त्रिणा आग्रहः कृतः। सः अवदत् यत् योग्यानां लाभार्थिनां समीपे जनकल्याणकारिणीनां योजनानां लाभं प्रापयितुं सर्वकारस्य प्राथमिकता अस्ति।

## मन्त्रिणः अधिकारिणश्च उपस्थिताः आसन्

कार्यक्रमे समाजकल्याण-मन्त्रिणी डॉ. श्वेता-गुप्ता मुख्यमन्त्रिणं हरितपादपेन, अङ्गवस्त्रेण, स्मृतिचिह्नेन च अभिनन्दितवती। स्थानिकैः जनप्रतिनिधिभिः अपि मुख्यमन्त्रिणः स्वागतं विहितम्।

अस्मिन् अवसरे उपमुख्यमन्त्री बिजेन्द्रप्रसाद यादवः, समाजकल्याणमन्त्रिणी डॉ. श्वेता-गुप्ता, संसदसदस्यः रविशङ्करप्रसादः, विधायकः श्याम रजकः, मुख्यमन्त्रिणः सचिवः लोकेशकुमारसिंहः, समाजकल्याणविभागस्य सचिवः विनोदसिंह गुञ्जियालः, समाजकल्याण-विभागस्य निदेशिका डॉ. प्रीतिः, मण्डल-दण्डाधिकारी कुन्दनकुमारः, वरिष्ठ-आरक्षी-अधीक्षकः कार्तिकेय के. शर्मा, च अन्ये वरिष्ठाः अधिकारिणः, अङ्गणवाडी- सेविका-सहायिकाः, बालकाः तेषां पालकाश्च उपस्थिताः आसन्।

# वार्तासंवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः।

अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि।

अद्य मया चतस्रः विचित्राः वार्ताः आनीताः। प्रथमा वार्ता अमेरिकादेशाद् अस्ति। तत्र एकेन सर्पेण त्रीणि कन्दुकानि अज्ञानात् खादितानि।

**नन्दिनी-** अहो विचित्रम्! तत्कथम्? किं सर्पस्य शल्यक्रिया कृता?

काव्या- न हि।

शल्यक्रियाम् विना एव पशुवैद्यैः तानि कन्दुकानि यत्नेन निष्कासितानि।

**नन्दिनी-** आश्चर्यम् एव। वैद्यैः उत्तमं कार्यं कृतम्।

द्वितीया वार्ता का?

**काव्या-** द्वितीया वार्ता बेङ्गलूरु-नगरात् अस्ति। तत्र एकेन जनेन आवासपरिसरे एव महान् यानसम्मर्दः दृष्टः। निर्गमनमार्गे अपि यानैः महान् अवरोधः जातः।

**नन्दिनी-** हा हन्त! मार्गे सम्मर्दः भवति इति मया श्रुतम्, किन्तु गृहाङ्गणे अपि सम्मर्दः जातः इति अतीव आश्चर्यजनकम्।

तृतीया वार्ता का?

**काव्या-** तृतीया वार्ता दुबई-नगरात्। तत्र एका लघुकक्ष्या मञ्च-मात्र-विस्तृता अस्ति, तथापि तस्याः भाटकम् पञ्चचत्वारिंशत्- सहस्र- रूप्यकाणि इति निर्धारितम्। तस्याः चलच्चित्रं सर्वैः दृष्टम्।

**नन्दिनी-** अहो महर्घता!

एतावता धनेन भारतदेशे विशाला गृहावासव्यवस्था सुलभा इति मया चिन्तितम्। किन्तु मार्गेषु सम्मर्दः भवति भारते।

अस्तु, अन्तिमा वार्ता का?

**काव्या-** यानसम्मर्दात् भीतया एकया महिलया पादचारि-सेतौ एव द्विचक्रिका चालिता। तस्याः अपि चलच्चित्रम् अन्तर्जाले प्रसारितम्।

**नन्दिनी-** अद्भुतम्! पादचारि-मार्गे यानं चालितम् इति मूर्खता एव। सर्वाः वार्ताः अतीव विचित्राः।

धन्यवादः काव्ये।